# Navaratnamala by Kalidas

# નવરત્નમાલા અથવા શ્યામલાનવરત્નમાલિકાસ્તોત્રમ્
# કાલિદાસવિરચિતમ્

## Document Information

Text title : Navaratnamala

File name : navaratnamala.itx

Category : devii, otherforms, stotra, kAlidAsa, nava, devI

Location : doc_devii

Author : Kalidasa

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : A poem by Kalidasa

Latest update : Feb. 27, 2008, February 10, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 19, 2024

*sanskritdocuments.org*

# નવરત્નમાલા અથવા શ્યામલાનવરત્નમાલિકાસ્તોત્રમ્
# કાલિદાસવિરચિતમ્

માતઙ્ગીસ્તોત્રં ચ

ઓઙ્કારપઞ્જરશુકીમુપનિષદુદ્યાનકેલિકલકણ્ઠીમ્ ।
આગમવિપિનમયૂરીમાર્યામન્તર્વિભાવયે ગૌરીમ્ ॥ ૧॥

દયમાનદીર્ઘનયનાં દેશિકરૂપેણદર્શિતાભ્યુદયામ્ । var દેશક
વામકુચનિહિતવીણાં વરદાં સઙ્ગીતમાતૃકાં વન્દે ॥ ૨॥

શ્યામલિમસૌકુમાર્યાં સૌન્દર્યાનન્દસમ્પદુન્મેષામ્ ।
તરુણિમકરુણાપૂરાં મદજલકલ્લોલલોચનાં વન્દે ॥ ૩॥

નખમુખમુખરિતવીણાનાદરસાસ્વાદનવનવોલ્લાસમ્ ।
મુખમમ્બ મોદયતુ માં મુક્તાતાટઙ્કમુગ્ધહસિતં તે ॥ ૪॥

સરિગમપધનિરતાં તાં વીણાસઙ્ક્રાન્તકાન્તહસ્તાં તામ્ ।
શાન્તાં મૃદુલસ્વાન્તાં કુચભરતાન્તાં નમામિ શિવકાન્તામ્ ॥ ૫॥

અવટુતટઘટિતચૂલીતાડિતતાલીપલાશતાટઙ્કામ્ ।
વીણાવાદનવેલાऽકમ્પિતશિરસાં નમામિ માતઙ્ગીમ્ ॥ ૬॥

વીણારવાનુષઙ્ગં વિકચમુખામ્ભોજમાધુરીભૃઙ્ગમ્ ।
કરુણાપૂરતરઙ્ગં કલયે માતઙ્ગકન્યકાપાઙ્ગમ્ ॥ ૭॥

મણિભઙ્ગમેચકાઙ્ગીં માતઙ્ગીં નૌમિ સિદ્ધમાતઙ્ગીમ્ ।
યૌવનવનસારઙ્ગીં સઙ્ગીતામ્ભોરુહાનુભવભૃઙ્ગીમ્ ॥ ૮॥

મેચકમાસેચનકં મિથ્યાદૃષ્ટાન્તમધ્યભાગં તે ।
માતસ્વરૂપમનિશં મઙ્ગલસઙ્ગીતસૌરભં વન્દે ॥ ૯॥ var માતસ્તવ સ્વરૂપં
નવરત્નમાલ્યમેતદ્ રચિતં માતઙ્ગકન્યકાભરણમ્ ।
યઃ પઠતિ ભક્તિયુક્તઃ સઃ ભવેત્ વાગીશ્વરઃ સાક્ષાત્ ॥

ઇતિ કવિકાલિદાસવિરચિતં નવરત્નમાલા અથવા
શ્યામલાનવરત્નમાલિકાસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by
Kapila Sankaran, Sunder Hattangadi

*Navaratnamala by Kalidas*

pdf was typeset on August 19, 2024

Please send corrections to *sanskrit@cheerful.com*